योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२२

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२
सर्गः ११६
सर्गः ५३
सर्गः ११७
सर्गः ५४
सर्गः ११८
सर्गः ५५
सर्गः ११९
सर्गः ५६
सर्गः १२०
सर्गः ५७
सर्गः १२१
सर्गः ५८
सर्गः १२२
सर्गः ५९
सर्गः १२३
सर्गः ६०
सर्गः १२४
सर्गः ६१
सर्गः १२५
सर्गः ६२
सर्गः १२६
सर्गः ६३
सर्गः १२७
सर्गः ६४
सर्गः १२८

द्वाविंशः सर्गः २२

भुशुण्ड उवाच ।

ततो जगति जातेषु भगवन्युष्मदादिषु ।

भरद्वाजपुलस्त्यात्रिनारदेन्द्रमरीचिषु ।। १

पुलहोद्दालकाद्येषु क्रतुभृग्वङ्गिरस्सु च ।

सनत्कुमारभृङ्गीशस्कन्देभवदनादिषु ।। २

गौरीसरस्वतीलक्ष्मीगायत्र्याद्यासु भूरिषु ।

मेरुमन्दरकैलासहिमवद्दर्दुरादिषु ।। ३

हयग्रीवहिरण्याक्षकालनेमिबलादिषु ।

हिरण्यकशिपुक्राथबलिप्रह्रादकादिषु ।। ४

शिबिन्यङ्कुपृथूलाख्यवैन्यनाभागकेलिषु ।

नलमान्धातृसगरदिलीपनहुषादिषु ।। ५

आत्रेयव्यासवाल्मीकिशुकवात्स्यायनादिषु ।

उपमन्युमणीमङ्कीभगीरथशुकादिषु ।। ६

अल्पकातीतकालेषु किंचिद्दूरेषु केषुचित् ।

तथाद्यतनसर्गेषु स्मरणे गणनैव का ।। ७

मुने ते ब्रह्मपुत्रस्य जन्माष्टकमिदं किल ।

संस्मराम्यष्टमे सर्गे तस्मिंस्त्वं मम संगतः ।। ८

कदाचिज्जायसे व्योम्नः कदाचिज्जायसे जलात् ।

कदाचिद्वायुतः शैलात्कदाचिज्जायसेऽनलात् ।। ९

यादृशो यादृशाचारो यादृक्संस्थानदिग्गणः ।

सर्गोऽयं तादृशानेव त्रीन्सर्गान्संस्मराम्यहम् ।। 6.1.22.१०

एकरूपाखिलाचारसंनिवेशधरामरान् ।

समकालान्स्थिरस्थैर्यान्दशसर्गान्स्मराम्यहम् ।। ११

अन्तर्धानं गता धात्री वारपञ्चकमुद्धृता ।

मुने पञ्चसु सर्गेषु कूर्मेणैव पयोनिधेः ।। १२

मन्दराकर्षणावेगपर्याकुलसुरासुरम् ।

स्मरामि द्वादशं चेदममृताम्भोधिमन्थनम् ।। १३

सर्वौषधिरसोपेतां बलिग्राहस्तदा दिवः ।

वारत्रयहिरण्याक्षो नीतवान्वसुधामधः ।। १४

रेणुकात्मजतां गत्वा षष्ठवारमिमं हरिः ।

बहुसर्गान्तरेणापि चकार क्षत्रियक्षयम् ।। १५

शतं कलियुगानां च हरेर्बुद्धदशाशतम् ।

शौकराजतयैवाप्तं स्मरामि मुनिनायक ।। १६

त्रिंशत्त्रिपुरविक्षोभान्द्वौ दक्षाध्वरसंक्षयौ ।

दशशक्रविघातांश्च चन्द्रमौलेः स्मराम्यहम् ।। १७

बाणार्थमष्टौ संग्रामाञ्ज्वरप्रमथमन्त्रकान् ।

विक्षोभितसुरानीकान्त्स्मरामि हरिशर्वयोः ।। १८

युगंप्रति धियां पुंसां न्यूनाधिकतया मुने ।

क्रियाङ्गपाठवैचित्र्ययुक्तान्वेदान्त्यराम्यहम् ।। १९

एकार्थानि समग्राणि बहुपाठानि मेऽनघ ।

पुराणानि प्रवर्तन्ते प्रसृतानि युगंप्रति ।। 6.1.22.२०

पुनस्तानेव तानेवमन्यानपि युगे युगे ।

वेदादिवित्प्रचितानितिहासान्स्मराम्यहम् ।। १

इतिहासं महाश्चर्यमन्यं रामायणामिधम् ।

ग्रन्थलक्षप्रमाणं च ज्ञानशास्त्रं स्मराम्यहम् ।। २२

रामवद्व्यवहर्तव्यं न रावणविलासवत् ।

इति यत्र धियां ज्ञानं हस्ते फलमिवार्पितम् ।। २३

कृतं वाल्मीकिना चैतदधुना यत्करिष्यति ।

अन्यच्च प्रकटं लोके स्थितं ज्ञास्यसि कालतः ।। २८

वाल्मीकिनाम्ना जीवेन तेनैवान्येन वा कृतम् ।

एतच्च द्वादशं वारं क्रियते विस्मृतिं गतम् ।। २५

द्वितीयमेतस्य समं भारतं नाम नामतः ।

स्मरामि प्राक्तनव्यासकृतं जगति विस्मृतम् ।। २६

व्यासाभिधेन जीवेन तेनैवान्येन वा कृतम् ।

एतत्तु सप्तमं वारं क्रियते विस्मृतिं गतम् ।। २७

आख्यानकानि शास्त्राणि निवृत्तानि युगंप्रति ।

विचित्रसंनिवेशानि संस्मरामि मुनीश्वर ।। २८

भूयस्तान्येव तान्येव तथान्यानि युगे युगे ।

साधो पदार्थजालानि प्रपश्यामि स्मरामि वै ।। २९

राक्षसक्षतये विष्णोर्महीमवतरिष्यतः ।

अधुनैकादशं जन्म रामनाम्नो भविष्यति ।। 6.1.22.३०

नारसिंहेन वपुषा हिरण्यकशिपुं हरिः ।

जघान वारत्रितयं मृगेन्द्र इव वारणम् ।। ३१

वसुदेवगृहे विष्णोर्भुवो भारनिवृत्तये ।

अधुना षोडशं जन्म भविष्यति मुनीश्वर ।। ३२

जगन्मयी भ्रान्तिरियं न कदाचन विद्यते ।

विद्यते तु कदाचिच्च जलबुद्बुदवत्स्थिता ।। ३३

दृश्यभ्रान्तिरनित्येयमन्तस्था संविदात्मनि ।

जायते लीयते चाशु लोला वीचिरिवाम्भसि ।। ३४

समेकसंनिवेशानि बहूनि विषमाणि च ।

तथार्धसमरूपाणि त्रिजगन्ति स्मराम्यहम् ।। ३५

तान्येव तादृक्कर्माणि तथान्याचरणानि च ।

तत्कर्माणि तथान्यानि भूतानीह स्मराम्यहम् ।। ३६

प्रतिमन्वन्तरं ब्रह्मन्विपर्यस्ते जगत्क्रमे ।

संनिवेशेऽन्यथाजाते प्रयाते संश्रुते जने ।। ३७

ममान्यान्येव मित्राणि अन्य एव च बन्धवः ।

अन्य एव नवा भृत्या अन्य एव समाश्रयाः ।। ३८

कदाचिदहमेकान्ते विन्ध्यकच्छकृतालयः ।

कदाचित्सह्यनिलयः कदाचिद्दर्दुरालयः ।। ३९

कदाचिद्धिमवद्वासी कदाचिन्मलयाचलः ।

कदाचित्प्राक्तनेनैव संनिवेशेन भूधरम् ।। 6.1.22.४०

चूतवृक्षे च शाखायां प्राप्य नीडं करोम्यहम् ।

अनाद्यन्तेषु यातेषु युगेषु मुनिनायक ।। ४१

प्राक्तनेनैव जातोऽयं संनिवेशेन पादपः ।

देहं त्यक्त्वा सुखं साधो नातः परिणतिं गतः ।। ४२

तदीयेनैव जातोऽयं संनिवेशेन पादपः ।

ताते जीवति यैवाभूच्छोभास्य सुतरोस्तथा ।। ४३

कृतप्राक्संनिवेशोऽयमहं स्थितिमिहागतः ।

नेहाभूदुत्तरा पूर्वं ककुब्नायं च भूधरः ।। ४४

दिगुत्तराभूदन्येयं पूर्वमेव महीधरः ।

एकैकदेहसंस्थानवीतब्रह्मनिशागमः ।। ४५

ध्यानान्ते तत्त्व एवैनं सर्गमालोक्य वेद्म्यहम् ।

अर्कादेर्ऋक्षसंच्चारान्मेर्वादिस्थानका दिशः।। ४६

संस्थानमन्यथा तस्मिन्स्थिते यान्ति दिशोऽन्यथा ।

न सन्नासज्जगन्मन्ये भ्रमयन्केवलं धियः ।। ४७

आत्मस्पन्दचमत्कारविभवोऽयं विजृम्भते ।

पुत्रः पितृत्वमायाति मित्रं यात्यरितां तथा ।। ४८

स्त्रीत्वं च शतशो यातान्पुंसश्चैव स्मराम्यहम् ।

कलौ कृतयुगाचारान्कृते कलियुगस्थितिम् ।। ४९

त्रेतायां द्वापरे चैव संस्मरामि मुनीश्वर ।

अदृष्टवेदवेदार्थान्स्वसंकेतविहारिणः ।। 6.1.22.५०

सर्गान्निरर्गलाचारान्क्वचित्कांश्चित्स्मराम्यहम् ।

ध्यातरि ब्रह्मणो ब्रह्मन्ससुरासुरमानुषम् ।। ५१

चतुर्युगसहस्रान्ते जगच्छून्यं स्मराम्यहम् ।

मनोमननिर्माणान्पार्थिवाकारवर्जितान् ।

व्याप्तान्वायुमयैर्भूतैर्दश सर्गान्स्मराम्यहम् ।। ५२

विचित्रसंस्थानविशेषदेशान्विचित्रकार्याकुलभूतकोशान् ।

विचित्रविन्यासविलासवेषान्स्मराम्यहं ब्रह्मदिनेष्वशेषाम् ।। ५३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भुशुं० चिरजीवितवर्णनं नाम द्वाविंशः सर्गः ।।२२।।